BARASAT GOVT COLLEGE LIBRARY 10 K N C Road, Barasat, Kol-124

# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 2nd Semester Examination, 2022

## SANHGEC02T/SANGCOR02T-SANSKRIT (GE2/DSC2)

Time Allotted: 2 Hours　　　　Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) चन्द्रापीडः कः आसीत् ? तस्य के गुणाः आसन् ?

(ख) धूर्ताः राजानं कथं प्रतारयन्ति ?

(ग) शुकनासः कः आसीत् ? स काम् 'अमृतस्य सहोदरा' इति अवदत् ?

(घ) शुकनासः कदा चन्द्रापीडाय उपदेशं प्रदत्तवान् ?

(ङ) उपदेशः कुत्र कर्तव्यः ? कुत्र च स विषवत् भाति ?

(च) राजलक्ष्म्याः के दोषाः दृश्यन्ते ?

(छ) कः आसीत् तारापीडः ? तस्य पुत्रस्य नाम किम् ?

2. अधोनिर्दिष्टं विषयद्वयमाश्रित्य टीका लेख्या – 5×2 = 10

(i) शुकनासः ; (ii) वाणभट्टः ; (iii) वसुजननी ; (iv) गुरुवचनम् ; (vi) हिडिम्बा ; (vii) आख्यायिका।

अथवा

अधोलिखितेषु द्वयं व्याख्येयम्। 5×2 = 10

(क) कुसुमशर-शरप्रहार-जर्जरिते हि हृदये जलमिव गलत्युपदिष्टम्।

(ख) अपरिणामोपशमो दारुणो लक्ष्मीमदः।

(ग) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्।

### SECTION-B

3. कश्चित् एकः प्रश्नः समाधेयः – 10×1 = 10

(क) शिवराजविजयस्य प्रथमनिश्वासमनुसृत्य भारते यवनराज्यस्य प्रतिष्ठायाः विस्तारस्य च वर्णनं प्रदेयम्।

(ख) अम्बिकादत्तव्यासेन विरचितस्य शिवराजविजयस्य काव्यशैली लिख्यताम्।

BARASAT GOVT COLLEGE LIBRARY 10 K.N.C Road, Barasat, Kol-124

4. अधोलिखितेषु विषयमेकम् आश्रित्य टीका लिख्यताम् – 5×1 = 5

(i) महामुनिः ; (ii) गौरवटुः।

अथवा

कस्यचिदेकस्य अनुच्छेदस्य व्याख्या कार्या – 5×1 = 5

(क) तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इत्यन्ये च मार्कण्डेय इति विश्वसन्ति स्म।

(ख) अहो चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासनसमयोऽयमस्मद्गुरुचरणानाम्, तत् सपदि अवचिनोमि कुसुमानि।

## SECTION-C

5. यथेच्छम् एकस्य प्रश्नस्य उत्तरं प्रदेयम् – 10×1 = 10

(क) सुबन्धुः कः आसीत् ? तद्विरचितस्य गद्यकाव्यस्य परिचयो देयः।

(ख) 'कादम्बरीरसज्ञानामाहारोऽपि न रोचते' इति वचनस्य तात्पर्य्यं वैशद्येन लिखत।

6. कमपि एकं विषयमाश्रित्य टीकां लिखत – 5×1 = 5

(i) दशकुमारचरितम् ; (ii) कादम्बरी।

अथवा

विषयमेकमवलम्ब्य व्याख्या कार्या – 5×1 = 5

(क) दण्डिनः पदलालित्यम्।

(ख) वाणोच्छिष्टं जगत् सर्वम्।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY 10 K N C Road, Barasat, Kol-124

लक्ष्यं सिद्धमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 2nd Semester Examination, 2021

## SANHGEC02T/SANGCOR02T-SANSKRIT (GE2/DSC2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) शुकनासोपदेशः कस्मात् ग्रन्थात् गृहीतः ? अस्य ग्रन्थस्य रचयिता कः ?

(ख) शुकनासः कस्मै किमुद्दिश्य उपदेशं दत्तवान् ?

(ग) वसुजननी का ? कथं सा वसुजननी उच्यते ?

(घ) शुकनासस्य उपदेशानुसारं बुद्धिः कदा कालुष्यमुपयाति ?

(ङ) 'कादम्बरी' शब्दस्य कोऽर्थः ? 'कादम्बरी' कीदृशः काव्यग्रन्थः ?

(च) शुकनासोपदेशे कः काम् अनार्य्याम् उवाच ?

(छ) 'अनर्थपरम्परा' इति पदेन किं बुध्यते ?

(ज) यौवनसमये यूनां दृष्टिः कथं भवति ?

2. अधोनिर्दिष्टेषु विषयेषु यथेच्छं द्वयम् आश्रित्य टीकां लिखत। 5×2 = 10

(क) गन्धर्वनगरलेखा, (ख) कुसुमशरः, (ग) व्यसनम्, (घ) राजलक्ष्मीः, (ङ) मृगतृष्णिका, (च) चन्द्रापीडः।

अथवा

अधोलिखितेषु पङ्क्तिद्वयं व्याख्येयम्। 5×2 = 10

(क) गर्भेश्वरत्वमभिनवयौवनत्वम् अप्रतिमरूपत्वम् अमानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः।

(ख) त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कते। दर्शनप्रदानमपि अनुग्रहं गणयति। दृष्टिपातमप्युपकारपक्षे स्थापयन्ति।

(ग) यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति।

BARASAT GOVT COLLEGE LIBRARY 10 K.N.C. Road, Barasat, Kol-124

## SECTION-B

3. कश्चिदेकः प्रश्नः समाधेयः। 10×1 = 10

(क) 'तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म' — कः कुत्र समाधौ तिष्ठति स्म ? तेन कदा समाधिः अङ्गीकृतः ? कथं स मृत्युं जितवान् ? 1+1+1+7

(ख) किं नाम ऐतिहासिककाव्यम् ? शिवराजविजयः ऐतिहासिकं काव्यं न वेति विचार्य्यताम्। 2+8

4. अधोलिखितेषु विषयेषु यथेच्छमेकम् अवलम्ब्य टीकां लिखत। 5×1 = 5

(क) सोमनाथतीर्थः।

(ख) विक्रमराज्यम्।

अथवा

कस्यचिदेकस्य अनुच्छेदस्य व्याख्यां लिखत। 5×1 = 5

(क) एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य।

(ख) बटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चाऽऽसीत्।

## SECTION-C

5. संस्कृतगद्यसाहित्येषु वाणभट्टस्य कृतिमाश्रित्य एकं प्रबन्धं लिखत। 10

अथवा

महाकवेः दण्डिनः रचनाशैली वर्ण्यताम्। 10

6. कमपि एकं विषयमाश्रित्य टीकां लिखत। 5×1 = 5

(क) वासवदत्ता, (ख) गद्यकाव्यम्।

अथवा

विषयमेकमवलम्ब्य व्याख्या कार्या। 5×1 = 5

(क) गद्यं कवीनां निकषं वदन्ति।

(ख) कादम्बरीरसज्ञानामाहारोऽपि न रोचते।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 2nd Semester Examination, 2020

## SANHGEC02T/SANGCOR02T-SANSKRIT (GE2/DSC2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) शुकनासोपदेशः कस्मात् काव्यग्रन्थात् गृहीतः ? अस्य ग्रन्थस्य रचयिता कः ?

(ख) चन्द्रपीडः कः आसीत् ? तस्मिन् के गुणाः आसन् ?

(ग) यौवनसमये अन्धकारः कीदृशः भवति ? स च कथं न दूरीभवति ?

(घ) शुकनासस्य मतानुसारम् अनर्थस्य कारणानि कानि ?

(ङ) यौवनसमये युवकानां प्रकृतिः कीदृशी भवति ?

(च) उपदेशः कुत्र कर्तव्यः ? कुत्र च स विषवत् भाति ?

(छ) राजानः कथम् उपहासपात्रतां भजन्ते ?

(ज) शुकनासः कस्मै किमुद्दिश्य उपदेशं दत्तवान् ?

2. अधोनिर्दिष्टं विषयद्वयम् आश्रित्य टीका लेख्या। 5×2 = 10

(i) शुकनासः, (ii) वसुजननी, (iii) वाणभट्टः, (iv) अनर्थपरम्परा, (v) मृगतृष्णिका, (vi) राजलक्ष्मीः।

अथवा

अधोलिखितेषु द्वयं व्याख्येयम् – 5×2 = 10

(क) निसर्गत एवाभानुभेद्यमारत्नालोकच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्।

(ख) अपरिणामोपशमो दारुणो लक्ष्मीमदः।

(ग) परस्परविरुद्धं चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरित्रम्।

BARASAT GOVT COLLEGE LIBRARY

## SECTION-B

3. कश्चित् एकः प्रश्नः समाधेयः। 10×1 = 10

(क) शिवराजविजयस्य प्रथमनिश्वासमनुसृत्य भारते यवनराज्यस्य प्रतिष्ठायाः विस्तारस्य च वर्णनं प्रदेयम्।

(ख) अम्बिकादत्तव्यासेन विरचितस्य शिवराजविजयस्य काव्यशैली लिख्यताम्।

4. अधोलिखितेषु विषयमेकम् आश्रित्य टीका लिख्यताम् – 5×1 = 5

(क) विक्रमराज्यम्।

(ख) यवनराज्यवृत्तान्तः।

अथवा

कस्यचिदेकस्य अनुच्छेदस्य व्याख्या कार्या। 5×1 = 5

(क) तं केचित् कपिल इत्यपरे लोमश इति इतरे जैगीषव्य इत्यन्ये च मार्कण्डेय इति विश्वसन्ति स्म।

(ख) धिगस्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मन आर्यवंश्यांश्चाभिमन्यामहे।

## SECTION-C

5. संस्कृतगद्यसाहित्येषु दण्डिनः काव्यकृतिमाश्रित्य नातिदीर्घम् एकं प्रबन्धं लिखतु। 10×1 = 10

अथवा

'कादम्बरीरसज्ञानामाहारोऽपि न रोचते' इति वचनस्य तात्पर्यं वैशद्येन लिखत। 10×1 = 10

6. कमपि एकं विषयमाश्रित्य टीकां लिखत। 5×1 = 5

(i) सुबन्धुः, (ii) गद्यकाव्यम्।

अथवा

विषयमेकमाश्रित्य व्याख्या कार्या। 5×1 = 5

(क) गद्यं कवीनां निकषं वदन्ति।

(ख) आख्यायिका कथा खण्डकथा परिकथा तथा।

कथालिकेति मन्यन्ते गद्यकाव्यञ्च पञ्चधा॥

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY 10 K N C Road, Barasat, Kol-124

# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 2nd Semester Examination, 2019

## SANHGEC02T/SANGCOR02T-SANSKRIT (GE2/DSC2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) शुकनासः कः आसीत् ? स कस्मै उपदेशं दत्तवान् ?

(ख) 'कादम्बरी' शब्दस्य अर्थः कः ? कीदृशः काव्यग्रन्थः कादम्बरी ?

(ग) लक्ष्मीः कस्मात् उत्थिता ? कथं सा 'अमृतसहोदरा' उच्यते ?

(घ) शुकनासोपदेशानुसारेण बुद्धिः कदा कालुष्यमुपयाति ?

(ङ) वसुजननी का ? कथं सा वसुजननी उच्यते ?

(च) लक्ष्मीः केषां समीपाद् दुरे तिष्ठति ?

(छ) शुकनासोपदेशे कः काम् अनार्य्याम् उवाच ?

(ज) शुकनासोपदेशस्य उत्सः कः ? अस्य ग्रन्थस्य रचयिता कः ?

2. अधोनिर्द्दिष्टं विषयद्वयम् आश्रित्य टीका लेख्या। 5×2 = 10

(क) व्यसनम्, (ख) गन्धर्वनगरलेखा, (ग) कालकूटः, (घ) मदजलम्, (ङ) वड़वानलः, (च) कुसुमशरः।

अथवा

अधोलिखितेषु पङक्तिद्वयं व्याख्येयम् – 5×2 = 10

(क) त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कते। दर्शनप्रदानमपि अनुग्रहं गणयन्ति, दृष्टिपातम् अप्युपकारपक्षे स्थापयन्ति।

(ख) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्ति अर्चनीयान्, नाभिवादयन्ति अभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्।

(ग) गर्भेश्वरत्वमभिनवयौवनत्वम् अप्रतिमरूपत्वरम् अमानुषशक्तित्वञ्चेति महतीयं खलु अनर्थपरम्परा। सर्वाविनयानाम् एकैकमपि एषामायतनम्, किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः।

3. कश्चित् एकः प्रश्नः समाधेयः – 10×1 = 10

BARASAT GOVT COLLEGE LIBRARY

(क) 'तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म – महामुनिः कुत्र समाधौ तिष्ठति स्म ? कदा तेन समाधिः अङ्गीकृतः ? कथं सः मृत्युं जितवान् ?

(ख) शिवराजविजयस्य प्रथमनिःश्वासमनुसृत्य श्रीमदम्बिकादत्तव्यासस्य रचनाशैली विलिख्यताम्।

4. अधोलिखितेषु विषयमेकम् अवलम्ब्य टीका लिख्यताम् – 5×1 = 5

(क) सकलकालनः करालः कालः।

(ख) सोमनाथतीर्थः।

अथवा

कस्यचिदेकस्य अनुच्छेदस्य व्याख्या कार्या – 5×1 = 5

(क) एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य।

(ख) मुकुटमणिर्महाराष्ट्राणाम्, भूषणं भटानाम्, निधिर्नीतीनाम्, कुलभवनं कौशलानाम्, पारावारः परमोत्साहानाम् कश्चन प्रातःस्मरणीयः, स्वधर्माग्रहग्रहग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन् पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति।

## SECTION-C

5. संस्कृतगद्यसाहित्यमवलम्ब्य एकं नातिदीर्घं प्रबन्धं लिखतु। 10×1 = 10

अथवा

वाणभट्टस्य रचनाशैली वर्ण्यताम्। 10×1 = 10

6. कमपि एकं विषयमाश्रित्य टीका लिख्यताम् – 5×1 = 5

(क) वासवदत्ता, (ख) हर्षचरितम्।

अथवा

विषयमेकमवलम्ब्य व्याख्या कार्या। 5×1 = 5

(क) दण्डिनः पदलालित्यम्।

(ख) अपादः पदसन्तानो गद्यम्।

——×——